# ॥ श्री व्यासराज स्तोत्रम् ॥

वंदे मुकुंदमरविंदभवादिवंद्यम्
इंदिंदिराप्रततमेचकमाकटाक्षं ।
बंदीकृतामरममंदमतिम् विदध्यात्
आनंदतीर्थहृदयांबुजमत्तभृंगः ॥ १ ॥

श्री व्यासयोगी हरिपादरागी
भक्तातिपूगी हितदक्षसद्गीः ।
त्यागी विरागी विषयेषु भोगी
मुक्तौ सदा गीतसुरेंद्रसंगी ॥ २ ॥

लक्ष्मीशपादांबुजमत्तभृंगः
सदा दशप्रज्ञनयप्रसंगः ।
अद्वैतवादे कृतमूलभंगः
महाव्रतीशो विषयेष्वसंगः ॥ ३ ॥

सदा सदायत्तमहानुभावः
भक्ताघतूलोच्छयतीव्रदावः ।
दौर्जन्यविध्वंसनदक्षरावः
शिष्येभ्य यो यच्छति दिव्यगावः ॥ ४ ॥

अद्वैतदावानलकालमेघः
रमारमस्नेहविदारिताघः ।
वाग्वैखरीनिर्जितसज्जनौघः
मायामतव्रातहिमे निदाघः ॥ ५ ॥

मध्वसिद्धांतदुग्दाब्धिवृद्दिपूर्णकलाधरः
व्यासराजयतींद्रो मे भूयादीप्सितसिद्धये ॥ ६ ॥

यन्नामग्रहणादेव पापराशिः पलायते ।
सोऽयं श्रीव्यासयोगींद्रो निहंतु दुरितानि नः ॥ ७ ॥

यन्मृत्तिकादर्शनमात्रभीतः
क्वचित्पिशाचस्तदनुव्रतेभ्यः ।
दत्वाधनं वांछितमाप्य तस्य
तैर्वा जितोऽयादचिरेण मुक्तिम् ॥ ८ ॥

यत्कौशिकानासिकाक्तजलान्निः शंकिते नरे ।
व्याघ्रोमहानपि स्प्रष्टुं नाशकत्त्वामिहाश्रये ॥ ९ ॥

द्वात्रिंशत्सप्तशतकमूर्तीर्हनुमतः प्रभो ।
प्रतिष्ठाता स्म्रुतिख्यातस्तं भजे व्यासयोगिनम् ॥ १० ॥

सीमानं तत्र तत्रैत्य क्षेत्रेषु च महामतिः ।
व्यवस्थाप्यात्र मर्यादां लभ्दवांस्तमिहाश्रये ॥ ११ ॥

मध्वदेशिकसिद्धांतप्रवर्तकशिखामणिः ।
सोऽयं श्रीव्यासयॊगींद्रो भूयादीप्सित सिद्धये ॥ १२ ॥

भूतप्रेतपिशाचाद्या यस्य स्मरणमात्रतः ।
पलायंते श्रीनृसिंहस्थानं तमहमाश्रये ॥ १३ ॥

वातज्वराऽदि रोगाश्च भक्त्या यमुपसेविनः ।
दृढव्रतस्य नश्यंति पिशाचाश्च तमाश्रये ॥ १४ ॥

तारापूर्णं बिंदुयुक्त प्रथमाक्षरपूर्वकम् ।
चतुर्थ्यंतं च तन्नाम नमः शब्दांतभूषितम् ॥ १५ ॥

पाठयंतं मध्वनयं मेघगंभीरया गिरा ।
ध्यायन्नावर्तयेद्यस्तु भक्त्या मेधां स विंदते ॥ १६ ॥

रत्नसिंहासनाऽरूढं चामरैरभिवीजितम् ।
ध्यायन्नावर्तते यस्तु महतीं श्रियमाप्नुयात् ॥ १७ ॥

प्रह्लादस्यावतरोसावींद्रस्याऽनुप्रवेशवान् ।
तेन तत्सेविनां नृणां सर्वमेतद्भवेद्ध्रुवम् ॥ १८ ॥

नमो व्यासमुनींद्राय भक्ताभीष्टप्रदायिने ।
नमतां कल्पतरवे भजतां कामधेनवे ॥ १९ ॥

व्यासराजगुरो मह्यं त्वत्पादांबुजसेवनात् ।
दुरितानि विनश्यंतु यच्छ शीघ्रं मनोरथान् ॥ २० ॥

यो व्यासत्रयसंज्ञकान् दृढतरान् मध्वार्यशास्त्रार्थकान्
रक्षद्वज्रशिलाकृतीन् बहुमातान् कृत्वा परैर्दुस्तरान् ।
प्रायच्छन्निजपादपद्मसरसिजासक्तनृणां मुदा
सोयं व्यासमुनीश्वरो भवतु मे तपत्रयाक्षांतये ॥ २१ ॥

मध्वभक्तो व्यासशिष्यपूर्णप्रज्ञमतानुगः ।
व्यासराजमुनिश्रेष्ठः पातु नः कृपया गुरुः ॥ २२ ॥

व्यासराजो व्यासराज इति भक्त्या सदा जपन् ।
मुच्यते सर्वदुःखेभ्यस्तदंतर्यामिणोबलात् ॥ २३ ॥

स्तुवन्ननेन मंत्रेण व्यासराजाय धीमते ।
अभिषेकार्चनादीन्यः कुरुते स हि मुक्तिभाक् ॥ २४ ॥

गुरुभक्त्या भवेद्विष्णुभक्तिरव्यभिचारिणी ।
तया सर्वं लभेद्धीमांस्तस्मादेतत्सदा पठेत् ॥ २५ ॥

न्यायचंद्रिकया युक्तं न्यायामृतकलानिधिम् ।
तर्कोडुतांडवकृतिं व्यासतीर्थविधुं भजे ॥ २६ ॥

॥ इति श्री विजयींद्रतीर्थ विरचित श्रीव्यासराजस्तोत्रम् संपुर्णं ॥